गुर, ई य ङ वधे । गव्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ॥)

गुर, ङ ई श्रि उद्यमे । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-अकं-सेट् ।) क्त्वी । ङ श्रि, गुरते अगुरिष्ट । ई, गूर्णः । इति दुर्गादासः ॥

गुरणं, क्ली, (गुर्+भावे ल्युट् ।) उद्यमः । इत्यमरः । ३ । २ । ११ ॥ अस्य रूपान्तरे गूरणं गोरणं इति भरतः ॥

गुरुः, पुं, (गृणाति उपदिशति वेदादिशास्त्राणि इन्द्रादिदेवेभ्यः इति । यद्वा गीर्य्यते स्तूयते देवगन्धर्व्वमनुष्यादिभिः । गॄ+"कृग्रोरुच ।" उणां । १ । २४ । इति उत् ।) बृहस्पतिः । (यथा, देवीभागवते । १ । ११ । ४४ ।
"इत्याश्वास्य गुरुं शक्रो दूतं वक्तुं विचक्षणः ॥")
निषेकादिकृत् । इत्यमरः । ३ । ३ । १६१ ॥ (यथा, मनुः । २ । १४२ ।
"निषेकादीनि कर्म्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥")
निषेको गर्भाधानं आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इति भरतः ॥ मन्त्रदाता । तस्य वर्ज्जनीयत्वं यथा, कालिकापुराणे ५४ अध्याये ।
"अभिशप्तमपुत्रञ्च सन्नद्धं कितवन्तथा ।
क्रियाहीनमकल्पाङ्गं वामनं गुरुनिन्दकम् ॥
सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत् ।
गुरुर्मन्त्रस्य मूलं स्यान्मूलशुद्धौ सदा शुभम् ॥"
अपि च । क्रियासारसमुच्चये ।
"श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः ।
कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः ॥
हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः ।
एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसम्मतः ॥"
इति तन्त्रसारः ॥ * ॥
गुरुवर्गो यथा,—
"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
वन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
मातामही मातुलानी तथा मातुश्च सोदरा ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥
नैतैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात् ।
जीवितार्थमपि द्वेषाद्गुरुभिर्नैव भाषणम् ॥
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः ।
गुरूणामेव सर्व्वेषां पूज्याः पञ्च विशेषतः ॥
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ।
यो भावयति या सूते येन विद्योपदिश्यते ॥
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ।
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ॥
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ।
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ॥
तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः ।
पिता माता च संप्रीतौ स्यातां पुत्त्रगुणैर्यदि ।
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ।
नास्ति पितृसमो देवो नास्ति मातृसमो गुरुः ॥
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ।
तयोर्न्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ।
वर्ज्जयित्वा मुक्तिफलं नित्यं नैमित्तिकं तथा ॥
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्दफलप्रदः ।
सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चाप्यास्यते दिवि ॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
पुंसा वर्त्मनिविष्टेन पूज्यो भर्त्ता तु सर्व्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्त्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामथाक्षयाँल्लोकान् प्रोवाच भगवान् मनुः ॥
मातुलांश्च पितृव्यांश्च श्वशुरांश्चर्त्विजो गुरून् ।
असावहमिति ब्रूयुः प्रत्युत्थाय यवीयसः ॥"
इति कूर्म्मपुराणे उपविभागे ११ अध्यायः ॥ * ॥
तस्य परीक्षा यथा ।
"सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः ।
नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः ॥
अपर्व्वमैथुनपरः पितृदेवार्च्चने रतः ।
गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥
दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः ।
परदारेषु विमुखो दृढसङ्कल्पको द्विजः ॥
अन्यैश्च वैदिकगुणैर्युक्तः कार्य्यो गुरुर्नृपैः ।
एतैरेव गुणैर्युक्तः पुरोधाः स्यान्महीभुजाम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
शिष्यकृतपापं गुरुं स्पृशति यथा ।
"मन्त्रिपापञ्च राजानं पतिं जायाकृतं तथा ।
तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत् ॥"
प्राय इति गुरुणा शिष्यः सम्यग्बोधितोऽपि तद्वाक्यमनादृत्य पापमेवाचरति तदा तत् पापं गुरौ न चाप्नोतीत्यर्थः ॥
"वर्णाश्रमाणां सर्व्वेषामाचारः सद्गतिप्रदः ।
गुरुस्त्रिवारमाचारं बोधयेत् कुलनायिके ! ॥
न गृह्णाति हि शिष्यश्चेत्तदा पापं गुरोर्न हि ।"
इति कुलार्णववचनात् । इति शिवार्च्चनचन्द्रिका ॥
मन्त्रदगुरोर्लक्षणं यथा ।
"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ।
उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
उद्धर्त्तुं चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः ।
तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" * ॥
देशभेदेन तस्य विशेषो यथा ।
"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः ।
अन्तर्व्वेदिप्रतिष्ठाना आवन्ताश्च गुरूत्तमाः ॥
गौडाः शाल्वोद्भवाः सौरा मगधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा ।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥
वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः ॥"
इति तन्त्रसारः ॥ * ॥
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः ॥"
इति चाणक्यम् ॥
कपिकच्छुः । इति राजनिर्घण्टः ॥ हिमाद्रिः । दीर्घः । इति शब्दरत्नावली ॥ (गृणाति उपदिशति वेदान् । गॄ+"कृग्रोरुच ।" उणां ।१।२४। इति उत् । वेदाध्यापयिताचार्य्यः । यथा, मनुः । ३ । १ ।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥"
गृणाति उपदिशति किञ्चिदपि यः । उपाध्यायः इत्यर्थः । यथा, मनुः । २ । १४९ ।
"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥"
गीर्य्यते स्तूयतेऽसौ ज्ञानतपोबलात् । ज्ञानप्रभावान्वितत्वात् तपोबलप्राधान्याद्वा पूज्यतमो महात्मा । यथा, मनुः । २ । १३० ।
"मातुलांश्च पितृव्यांश्च श्वशुरांश्चर्त्विजो गुरून् ।"
"भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयोश्च कनिष्ठयोरपि सम्भवात् तद्विषयोऽयं गुरुशब्दः ।" इति टीकाकृत् कुल्लूकभट्टः । गृणाति उपनीय-सन्ध्योपासनाचारादीनि कर्म्माणि उपदिशति । उपनेता सन्ध्योपासनाद्युपदेष्टा च । यथा, मनुः । २ । ६९ ।
"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च ॥"
पिता । यथा, रामायणे । २ । ७९ । २ ।
"गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः ।"
राजचक्रवर्त्ती सम्राट् । यथा, रघुः २ । ६८ ।
"गुरुर्नृपाणां गुरवे निवेद्य ।"
गिरति अज्ञानमन्तर्यामिरूपेणाविद्यां नाशयतीत्यर्थः । गीर्य्यते स्तूयते जीवनिकरैरिति वा । गॄ वा उत् । विष्णुः । यथा, महाभारते । १३ । १४९ । ६५ ।
"आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥"
शिवः । तत्रैव । १७ । १३० ।
"सहस्रहस्तो देवेन्द्रः सर्व्वदेवमयो गुरुः ।"
ब्रह्मा । माननीयः । एकेनैव श्लोकेनैतयोरुदाहरणं यथा, काशीखण्डे । ६६ । ७१ ।
"विभ्रत् सहजकाठिन्यं जातो गौरीगुरुर्गुरुः ।
शम्भुं प्रपूज्य सुतया सजा विश्वगुरोरपि ॥"
विश्वगुरोर्ब्रह्मणोऽपिगुरुर्माननीयः पूज्यो वा इति तट्टीका ।
उपदेष्टृ अर्थे यथा सुश्रुतसूत्रस्थाने तृतीयाध्याये "अथ वत्स ! तदेतदध्येयं यथा तथोपधारय